# Preface.

In the beginning of the year 1932 the editor Prof. Dr. W. Caland, my revered teacher and collaborator, passed away leaving the completion of his unfinished works to me. One of these works is the Kāṇvīya Śatapatha. Though it was complete in manuscript in 1912, the first volume containing the introduction and 96 pages of the Sanskrit text could only be printed off in 1926. The publishers being overbusy with other works the printing of the second volume was indefinitely delayed, until in 1933 it was resumed under my supervision On me devolved the pleasant but difficult duty of revising the press copy and seeing it through the press

On behalf of the publishers and myself I have to express great regret at the loss through misplacement by the publishers of the variae lectiones for page 173, which, however, I hope to make good in the Errata and Addenda at the end of the second volume when it is completed.

JANUARY, 1, 1939. **Raghu Vira**

स्या ह्येतत्पृथिव्या ओषधीनां मूलान्युपोनत्ति[1] ॥ ५ ॥ अथ विस्रꣳस्य पुरस्ता- 5
त्प्रस्तरं गृह्णाति विष्णो स्तुपो ऽसीति यज्ञो वै विष्णुरयमु वै स्तुपो यच्छिखा[2]
तमेवैतद्यज्ञे दधाति स यत्पुरस्ताद् गृह्णाति तस्मादयं पुरस्तात्स्तुपः ॥ ६ ॥ अथ 6
संनहनं विस्रꣳस्य प्रकल्पयति तथा हास्य प्रक्लृप्तꣳ स्त्री विजायते तद्दक्षिणस्याꣳ
श्रोणौ स्तृणाति नीविर्ह वा अस्यैषा दक्षिणत उ वा इयं नीविस्तस्माद्दक्षिणस्याꣳ
श्रोणौ स्तृणाति तद्बर्हिषाभिच्छादयत्यभिच्छन्नेव हीयं नीविः ॥ ७ ॥ स य- 7.8
त्स्तृणात्ययं वाव स्तुपः प्रस्तरो ऽथ यान्यतो ऽवाञ्चि लोमान्येतान्येवास्य बर्हिरे-
तान्येवैतद्यज्ञे दधाति योषा वा एषा[3] यद्वेदिस्तां दक्षिणतो देवाश्च पर्यासते य
उ चेमे मनुष्यदेवा ब्राह्मणाः शुश्रुवाꣳसो ऽनूचाना एतेष्वेवैनामेतत्पर्यासीनेष्व-
नग्नां करोत्यनग्नताया उ एव ॥ ८ ॥ अथ यद्बेवैनाꣳ स्तृणात्येतावती ह वै 9.10
पृथिवी यावती वेदिरोषधयो वै बर्हिरोषधीरेवैतदस्यां पृथिव्यां दधाति ता
इमा ओषधयो ऽस्यां पृथिव्यां प्रतिष्ठितास्तस्मादेनां बहुलाꣳ स्तृणीयाद्यत्र ह्यस्या
बहुलतमा ओषधयस्तदुपजीवनीयतमं[4] तदु तदाहर्तर्यधि[5] त्रिवृत्स्तृणाति[6] त्रिवृद्धि
यज्ञो ऽथो प्रवर्हꣳ[7] स्तृणन्ति बर्हिरानुषागिति ह्यृषिणाभ्यनूक्तमस्ति यद्वै प्रवर्हं[7]
तदानुषगधरमूलꣳ[8] स्तृणात्यधरमूला इव हीमा ओषधयः प्रतिष्ठिताः ॥ ९ ॥ स 11
स्तृणात्यूर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्य इति साधुं देवेभ्य इत्येवैत-
दाह यदाहोर्णम्रदसमिति स्वासस्थां देवेभ्य इति स्वासदां देवेभ्य इत्येवैत-
दाह ॥ १० ॥ अथाग्निं कल्पयति शिरो वा एतद्यज्ञस्य यदाहवनीयः पूर्वार्धो 12
ह्येष[10] यज्ञस्य पूर्वार्धो हि शिरो यज्ञस्यैवैतच्छिरः कल्पयति स उपर्युपरि प्रस्तरं
धारयन्कल्पयत्ययं[11] वाव स्तुपः प्रस्तर एतमेवैतच्छिरसि प्रतिदधाति तस्मादयꣳ

1. मूलान्युपोनत्ति Mss. 2. यच्छुर्षा O., याच्छषां My., यच्छ–C. originally, corrected into यच्छुर्षी (or यच्छुवी?), यस्य (sec. m. यस्त) पितत्सिखे M. 3. एषो B. 4. °नीयतमं C. O. 5. तदाहर्तर्याधे B., तदाहर्तर्गधि C. O. 6. त्रिवृतꣳ C. O. My. M. स्तृणाति Mss. 7. प्रब° C. O. My., and B. the second time (sec m.) 8. Thus emended, °मूला Mss. 9. °दां B. M., °दं C. O. M. 10 ह्येव M. 11. धारय° C. O.

प्रजापतिस्तदु संवत्सराय प्रजापतये निह्नुते ऽग्ने पूषन्बृहस्पते[1] प्र च वद प्र च
यजेति यक्ष्यन्वा[2] इदमनुवक्ष्यन्भवति[3] तदेताभ्यो देवताभ्यो निह्नुते यूयमनु-
ब्रूत[4] यूयं यजतेति वसूनाꣳ रातौ स्याम रुद्राणामुर्व्यायाꣳ स्वादित्या अदितये
स्यामानेहस इत्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एतेषामभिगुप्तौ स्या-
मेत्येवैतदाह तस्य हि नार्तिरस्ति न ह्वला य एतेषामभिगुप्तौ ॥ ८ ॥ जुष्टा- 18-20
मद्य देवेभ्यो वाचमुद्यासमिति जुष्टं देवेभ्यो ऽनूच्यासमित्येवैतदाह तद्धि समृद्धं
यो जुष्टं देवेभ्यो ऽनुब्रवज्जुष्टां[5] ब्रह्मभ्य इति जुष्टं ब्राह्मणेभ्यो ऽनूच्यासमित्ये-
वैतदाह तद्धि समृद्धं यो जुष्टं ब्राह्मणेभ्यो ऽनुब्रवज्जुष्टां[5] नराशꣳसायेति प्रजा
वै नरस्तदाभ्यः सर्वाभ्यः प्रजाभ्य आह तद्धि समृद्धं यत्र यश्च वेद यश्च न सा-
ध्वन्ववोचत्साध्वन्ववोचदित्येव वितिष्ठन्ते यदद्य होतृवर्ये जिह्मं चक्षुः पराप-
तात्[6] । अग्निष्टत्पुनराहियाज्जातवेदा[7] विचर्षणिरिति यथा यानमूनग्रे[8] होत्राय
प्रावृणत ते प्राधन्वन्नेवं मे यत्किं चित्प्रवरेणामायि तन्मे पुनराप्यायतामित्ये-
वैतदाह तथा हास्य तत्पुनराप्यायते ॥ ९ ॥ अथाध्वर्युं चाग्नीधं च संमृशति 21
मनो वा अध्वर्युर्वाग्घोता ते एवैतत्संदधाति ते हि सꣳहिते युक्ते देवेभ्यो यज्ञं[9]
वहतो[9] ऽग्नीधमुपस्पृशत्यनन्तरायाय ॥ १० ॥ तत्र जपति षण्मोर्वीरꣳहसस्पान्त्व- 22
ग्निश्च पृथिवी चापश्च वातश्चाहश्च रात्रिश्चेत्येता वै षळुर्व्य[10] एता मा सर्वस्या आर्तेः
सर्वस्या ह्वालाया गोपायन्त्वित्येवैतदाह तस्य हि नार्तिरस्ति न ह्वला यमेता आ-
र्तेर्गोपायन्ति[11] ॥ ११ ॥ अथ होतृषदनात्तृणं निरस्यति निरस्तः परावसुरिति 23-24
परावसुर्ह वै नामासुराणाꣳ होता तमेवैतद्धोतृषदनान्निरस्यतीदमहमर्वावसोः स-

1. बृहस्पते MSS. (but cp. IV. 7. 3. 8). 2. यक्ष्यन्वा MSS. 3. इदमनुवक्ष्यन्भवति C. O., इदमनुवक्ष्यन्भवति B. 4. Thus M. only; °ब्रूथ the other MSS. 5. जुष्टुव° B. C. O. (the first time). 6. Thus C. O., °पतत् B., °पत् My., °पपाते M. 7. Thus (°हि°) MSS. 8. देवा ins. M. 9. यज्ञं वहतो MSS. 10. षलुर्व्य B., षलुर्व्यं C. O. 11. °यंति B. O. C. (sec. m.).

